महा वि॰ का नाम

अ॰ वि॰ सिं॰ महावि॰ रहीमपुर, खगड़िया।

दिनाङ्क - 3.7.2020

शास्त्री प्रथम खण्ड (नवदिव्यं)

अनिवार्य प्रथम पत्र व्याकरण (प्रतिष्ठा)

विषय → कृदन्ते कृत्य प्रक्रिया प्रकरणम्

"पोरदुपधात्" → पवर्गान्ताद् अदुपधाद् यत् स्यात्। ण्यतोऽपवादः। शप्यम्। लभ्यम्।

"एतिस्तुशास्वृदृजुषः क्यप्" एभ्यः क्यप् स्यात्। "ह्रस्वस्य पिति कृति तुक्" - इत्यः। स्तुत्यः। शासु अनुशिष्टौ। "शास इदङ्हलोः" शासे उपधाया इत्स्यादङि हलादौ क्ङिति। शिष्यः। वृत्यः। आदृत्यः। जुष्यः। "मृजेर्विभाषा" - मृजेः क्यब्वा स्यात्। मृज्यः।

प्रयोगः → शिष्यः - शास् धातोः 'एतिस्तुशास्वृ' इति क्यप्यनुबन्धलोपे, 'शास इदङ्हलोः' इति उपधाया इत्वे, 'शासिवसि-' इति सस्य षत्वे विभक्तिकार्ये च 'शिष्यः' इति।

"ऋहलोर्ण्यत्" - ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत्। कार्यम्। हार्यम्। धार्यम्।

"चजोः कु घिण्ण्यतोः" - चजोः कुत्वं स्याद् घिति ण्यति च परे। "मृजेर्वृद्धिः" → मृजेरिको वृद्धिः स्यात् सार्वधातुकार्धधातुकयोः। मार्ग्यः।

'मार्ग्यः' ~~मार्ग्य~~ → मृज धातोः 'ऋहलोर्ण्यत्' इति ण्यति, 'चजोः कु-' इति कुत्वेन जकारस्य गकारे 'मृजेर्वृद्धिः' इति वृद्धौ, ततो विभक्तिकार्ये मार्ग्यः इति।

"भोज्यं भक्ष्ये" - भोज्यमन्यत्।

विषय → कृदन्ते (पूर्वकृदन्त प्रकरणम्)

"ण्वुल्तृचौ" → 'धातोरेतौ स्तः।' कर्तरि कृदिति — कर्त्रर्थौ। "युवोरनाकौ" — 'यु' 'वु' → एतयोरनाऽकौ स्तः।
कारकः। कर्ता।

प्रयोग — कारकः → कृधातोः 'ण्वुल्तृचौ' इति ण्वुल्यनुबन्धलोपे 'युवोरनाकौ' इति 'वु' इत्यस्य अकि, णित्वाद् वृद्धौ (आर्) विभक्तिकार्ये च कृते कारकः इति। "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" नन्द्यादेर्ल्युः, ग्रहादेर्णिनिः, पचादेरच् स्यात्। नन्दयतीति नन्दनः। जनमर्दयतीति जनार्दनः। लवणः। ग्राही। स्थायी मन्त्री। पचादिराकृतिगणः।

प्रयोग - नन्दनः → टुनदि 'समृद्धौ' इत्य

धातोर्णिचि लोपे 'नन्दिग्रहीत्यादिना ल्युकृतेऽनुब लोपे "युवोरनाकौ" इत्यनादेशे विभक्तिकार्ये नन्दनः' इति।

"लुनातीति लवणः → लूञ् छेदने क्र्यादि। अत्र निपातनाण्णत्वम्। गृह्णातीति ग्राही। ग्रह उपादाने। तिष्ठतीति स्थायी → ष्ठा — गति निवृत्तौ। मन्त्रयते इति मंत्री — मंत्रि गुप्तभाषणे। बुध्यते इति बुधः बुध अवगमने। "इगुपधज्ञाप्रीकिरः कः — एभ्यः कः स्यात्। बुधः। कृशः। ज्ञः। प्रियः। किरः। "कृश्यतीति → कृशः कृश तनुकरणे। जानातीति ज्ञः। प्रीणातीति प्रियः। किरतीति किरः। गृह्णाति धान्यादिमिति गृहम्। कुम्भं करोतीति कुम्भकार



NOTES

दिनेश प्र० सिंह
(एसोसिएट प्रोफेसर)
(व्याकरण)

Scanned with CamScanner